श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ८१

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीमते कृष्णाय परब्रह्मणे नमः
श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ८१

*सुभद्राहरणं कालिन्द्यादिविवाहवर्णनं*
*नरकासुरवधवर्णनं च*

स्निग्धां मुग्धां सततमपि तां लालयन् सत्यभामां
यातो भूयः सह खलु तया याज्ञसेनीविवाहम्।
पार्थप्रीत्यै पुनरपि मनागास्थितो हस्तिपुर्यां
शक्रप्रस्थं पुरमपि विभो संविधायागतोऽभूः॥ १ ॥

भद्रां भद्रां भवदवरजां कौरवेणार्थ्यमानां
त्वद्वाचा तामहृत कुहनामस्करी शक्रसूनुः।
तत्र क्रुद्धं बलमनुनयन् प्रत्यगास्तेन सार्धं
शक्रप्रस्थं प्रियसखमुदे सत्यभामासहायः॥ २ ॥

तत्र क्रीडन्नपि च यमुनाकूलदृष्टां गृहीत्वा
तां कालिन्दीं नगरमगमः खाण्डवप्रीणिताग्निः।
भ्रातृत्रस्तां प्रणयविवशां देव पैतृष्वसेयीं
राज्ञां मध्ये सपदि जहृषे मित्रविन्दामवन्तीम्॥ ३ ॥

सत्यां गत्वा पुनरुदवहो नग्नजिन्नन्दनां तां
बध्वा सप्तापि च वृषवरान् सप्तमूर्तिर्निमेषात्।
भद्रां नाम प्रददुरथ ते देव सन्तर्दनाद्या-
स्तत्सोदर्या वरद भवतः साऽपि पैतृष्वसेयी॥ ४ ॥

पार्थाद्यैरप्यकृतलवनं तोयमात्राभिलक्ष्यं
लक्षं छित्वा शफरमवृथा लक्ष्मणां मद्रकन्याम्।

अष्टावेवं तव समभवन् वल्लभास्तत्र मध्ये
    शुश्रोथ त्वं सुरपतिगिरा भौमदुश्चेष्टितानि॥ ५ ॥

स्मृतायातं पक्षिप्रवरमधिरूढस्त्वमगमो
    वहन्नङ्के भामामुपवनमिवारातिभवनम्।
विभिन्दन् दुर्गाणि त्रुटितपृतनाशोणितरसैः
    पुरं तावत् प्राग्ज्योतिषमकुरुथाः शोणितपुरम्॥ ६ ॥

मुरस्त्वां पञ्चास्यो जलधिवनमध्यादुदपतत्
    स चक्रे चक्रेण प्रदलितशिरा मङ्क्षु भवता।
चतुर्दन्तैर्दन्तावलपतिभिरिन्धानसमरं
    रथाङ्गेन छित्वा नरकमकरोस्तीर्णनरकम्॥ ७ ॥

स्तुतो भूम्या राज्यं सपदि भगदत्तेऽस्य तनये
    गजञ्चैकं दत्वा प्रजिघयिथ नागान्निजपुरीम्।
खलेनाबद्धानां स्वगतमनसां षोडश पुनः
    सहस्राणि स्त्रीणामपि च धनराशिं च विपुलम्॥ ८ ॥

भौमापाहृतकुण्डलं तददितेर्दातुं प्रयातो दिवं
    शक्राद्यैर्महितः समं दयितया द्युस्त्रीषु दत्तह्रिया।
हृत्वा कल्पतरुं रुषाभिपतितं जित्वेन्द्रमभ्यागम-
    स्तत्तु श्रीमददोष ईदृश इति व्याख्यातुमेवाकृथाः॥ ९ ॥

कल्पद्रुं सत्यभामाभवनभुविसृजन् द्व्यष्टसाहस्रयोषाः
    स्वीकृत्य प्रत्यगारं विहितबहुवपुर्लालयन् केलिभेदैः।
आश्चर्यान्नारदालोकितविविधगतिस्तत्र तत्रापि गेहे
    भूयः सर्वासु कुर्वन् दश दश तनयान् पाहि वातालयेश॥ १० ॥

**********


www.prapatti.com